# एकविध एवाभाव इति नव्यतराचार्यमतम्

वीरनारायणाचार्यः पाण्डुरङ्गी
वेदान्तनिकायाध्यक्षः
कर्नाटकसंस्कृतविश्वविद्यालये बेङ्गलूरुनगरे

प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन त्रिविधोभाव इति प्राचीनाः नव्याश्च।

प्रागभावः, प्रध्वंसाभावश्चेति अभावो द्विविधः इति न्यायमञ्जरीकारमतम्।

## एकविध एवाभाव इति नव्यतराचार्यमतम्

नव्यतराचार्यास्त्वाहुः- वस्तुतस्तु नैव त्रिविधोभावः, किन्त्वेकविध एव। तथा हि प्रतीत्यनुसारेण खलु पदार्था व्यवस्थाप्यन्ते, न तु स्वेच्छया। प्रतीतिश्च सर्वस्यैवाभावस्य घटो नास्तीत्येव, न तु घटो भविष्यति, घटो ध्वस्त इति वा। भविष्यति नष्ट इत्यादिप्रतीतेः उत्पादक-नाशकादिक्रियाविषयकत्वात्।

## प्रागभावनिरासः

**ननु उत्पन्नस्य** घटस्य पुनरुत्पत्तिवारणाय प्रागभावोङ्गीकार्य इति चेन्न। किमुत्पन्नस्यैतद्धटस्यैव पुनरुत्पत्तिरापाद्यते, घटान्तरस्य वा। न द्वितीयः, पर्याप्तमृदादिसत्त्वे कुलालव्यापारान्तरसत्त्वे च घटान्तरस्योत्पत्तेः प्रत्यक्षसिद्धत्वात्। नाद्यः। तत्कार्यं प्रति तत्कार्याकालीनतदभावस्यापि हेतुतया तदा एतद्धटाकालीनाभावासत्त्वादेव तदसंभवात्।

ननु एतद्धटाभावः यो हि एतद्धटं प्रति हेतुतया भवता कथ्यते स एव प्रागभाव इति चेन्न। तस्य प्रागभावत्वे प्रमाणाभावात्। तस्य चाभावसामान्यरूपत्वात्।

ननु कीदृशोयमभावः, किं तस्य घटोत्पत्त्यनन्तरमपि सत्त्वम्? यदि न, तर्हि योयं घटोत्पत्त्या नश्यति स एव प्रागभावः अनादिस्सान्त इति चेन्न। न हि घटोत्पत्त्या अयमभावो नश्यति। किन्तु निलीयते। कुत्र निलीयते, को वा दृष्टान्त इति चेदित्थं- यथा पूर्वमाकाशोत्र आसीत्। आकाशस्तु सर्वगत एव। तथापि तत्र मध्यावकाशरहितघनीभूतद्रव्योत्पत्तौ तादृशद्रव्यानयने वा कुत्र गतोयमाकाश इति वक्तव्यम्?। यदि तादृशघनद्रव्यदेशे आकाशो नश्यति कथं नित्यत्वं, देशान्तरं गत इति चेत्कथं क्रियारहितस्य गमनं, कथं वा सर्वगतत्वम्? अथ तत्राप्यस्त्येवाकाशः, न तु प्रतीयते, निलीनत्वात् इति चेत्- एवमेव घटे उत्पन्ने सति निलीयते अयमभावः, न तु नश्यति। अस्याभावस्य अनादेः नाशकासंभवेन नाशासंभवात्।

## अभावस्य नाशकासंभवः

अथ कथं नाशकाभावः घटोत्पत्तेरेव तन्नाशरूपत्वादिति चेत्-न। घटस्य खल्वियमुत्पत्तिः। उत्पत्तिसामग्री च उत्पत्तिमेवापादयति। न तु अभावस्य नाशम्, तस्य समवायिकारणाद्यभावेन समवायिकारणनाशस्य असमवायि-कारणनाशस्य पदार्थान्तरस्य पाकस्य आश्रयनाशस्य वा अभावात्।

किं च यो नोत्पद्यते स नैव नश्यति। यथा आकाशः। नोत्पद्यते चाभावः नैव नश्यति। तथा च घटोत्पत्तेः पूर्वं विद्यमान एवाभावः घटसत्ताकाले निलीनो भूत्वा पुनरेव घटनाशानन्तरं प्रतीयते।

**घटस्यैव घटप्रागभावनाशरूपत्वासंभवः**

ननु घटोत्पत्तिरेव घटप्रागभावध्वंसः, तथा घट एव च घटध्वंसप्रागभावरूपः, घटध्वंसश्च घटध्वंसप्रागभावध्वंसरूपः, इति प्रागभावस्य नान्यो नाशः इति चेन्न। घटगताया उत्पत्तेः घटप्रागभावध्वंसरूपत्वासंभवात्। अन्यः खलु घटप्रागभावः अन्यश्च घटः, अन्यथा पटस्य नाशः घटस्योत्पत्तिरित्यपि स्यात्। तस्मात्प्रागभावस्य ध्वंसः घटादिरूपो न संभवत्येव।

**अभावकाले प्रतियोगिसत्त्वेपि तयोर्विरोधोपपादनम्**

अथ घटोत्पत्त्यनन्तरमपि तदभावसत्त्वे कुतो वा न घटकाले तदभावप्रतीतिरिति चेत्- प्रतियोगिकालभिन्नकालवृत्त्यभावस्यैव प्रतियोग्यधि-करणदेशे नास्तीति प्रतीतिविषयत्वात्[1] प्रतियोगिकालवृत्त्यभावस्य नास्तीति प्रतीत्यविषयत्वात्।

अथ समानकालीनत्वे कथं तयोर्विरोधः सर्वलोकसिद्ध इति चेत्- न। विरोधासिद्धेः। अभावनाशकाभावेन अभावस्थितेरवश्याभ्युपेयत्वात्। स्थिते चाभावे विरोधो नास्त्येव। प्रतीत्योर्विरोधेन तद्विषययोर्विरोधनिर्वाहसंभवाच्च। घटाभावप्रतीतौ च घटवत्ताप्रतीतिः प्रतिबन्धिकेति न तदा घटाभावप्रतीतिप्रसङ्गः।

**श्वः घटो भविष्यति इति प्रतीतिविरोधनिरासः**

श्वः घटो भविष्यति इति प्रतीतिश्च घटस्य श्वःकालोत्पत्तिकत्वम्, एतद्दिने घटात्यन्ताभावं चावगाहते, न तु प्रागभावम्। तथात्वे इदानीं घटप्रागभाव इत्येव प्रतीत्यापत्तेः। इदानीं घट इतिवत्। न च कस्यापि पुरुषस्य इदानीं घटप्रागभाव इति प्रतीतिः।

किंच अस्मिन् भूतले श्वः घटसंयोगो भविष्यति इति वस्तुस्थितिः। परन्तु घटरहितं भूतलम् अद्य दृष्ट्वा श्वः भूतले घटसंयोगो भविष्यति इति न कोपि प्रत्येति। किन्तु घटसंयोगो नास्तीत्येव, श्वः किं भविष्यतीति न कोपि जानाति। तस्मात् श्वः घटो भविष्यतीति प्रतीतिः संभावनारूपैव न तु

---

[1] यथा न्यायैकदेशिमते भूतले घटात्यन्ताभावस्य वृत्तौ घटसंयोगाभावो नियामक इति अनेकेषु प्रदेशेषु तद्वत्सु संसृज्य वर्तमानो घटात्यन्ताभावः क्वचित्प्रदेशे घटसंयोगोत्पत्त्या तदभावनिवृत्तौ न संसृज्यते। सिद्धान्तलेशसंग्रहे।

घटप्रागभावविषयिणी। किंच कस्येयं प्रतीतिरिरिति वक्तव्यम्। न हि कुलालगृहं पश्यन्तः रथ्याचारिणः घटशून्यं कुलालगृहं दृष्ट्वा श्वः भविष्यति घट इति प्रतियन्ति। किन्तु घटो नास्तीत्येव। यैश्च श्वः घटनिर्माणार्थमादिष्टः कुलालः तेच पूर्वदिने कुलालेनोक्ताः श्वः घटो भविष्यति इति। सा च प्रतीतिश्शाब्दबोधरूपा, संभावनारूपा वा, सा च घटे श्वःकालोत्पत्तिमेव विषयीकरोति। श्वस्त्वादिकं च काले स्वाभाविको धर्मः, न तु प्रागभावघटितः इति न विरोधः। भविष्यत्त्वं च अनन्तरकालोत्पत्तिकत्वम्। काले अनन्तरत्वं च स्वाभाविको धर्मः।

ननु प्रागभावानङ्गीकारे घटे पाकेन रूपरसादीनामुत्पत्तिकाले कारणानां साम्येन कार्यभेदाभावापत्त्या तदर्थं प्रागभावरूपसामग्रीभेदोङ्गीकार्य इति चेन्न। एकस्यैव घटस्य स्वरूपभूताः रूपरसादयः व्यञ्जकभेदेन कदाचित् कदाचिद्व्यज्यन्ते इति स्वीकारेण तेषां भेदाभावात्। अत एव 'गुणसमुदायो हि द्रव्यम्' इति पतञ्जलिः। रूपादीनां घटाद्भेदेपि तत्तद्रूपादिकारणीभूतपाकभेदेन कार्यभेदोपपत्तेः।

### ध्वंसनिरासः

ध्वंसोपि नास्त्येव। घटो नश्यति इति प्रतीतिश्च घटाभावव्यञ्जिकां घटादिनिष्ठां क्रियामेव विषयीकरोति, न तु घटध्वंसरूपमभावम्। घटो नश्यति इत्यस्य घटः ध्वंसप्रतियोगी भवतीति नार्थः। तथा सति चिरध्वस्ते घटेपि "घटो नश्यति" इति वर्तमानत्वावगाहिप्रत्ययापत्तिः, ध्वंसप्रतियोगित्वस्य वा घटध्वंसस्य वा वर्तमानत्वात्। अत एव चिरध्वस्ते घटे 'घटः प्राङ्नष्ट' इत्येव भूततावगाहिनी प्रतीतिः, क्रियायाः चिरसमाप्तत्वात्।

घटो ध्वस्त इति प्रतीतिरपि अभावव्यञ्जकक्रियामेव विषयीकरोति, न तु ध्वंसात्मकाभावम्। तर्हि चिरध्वस्ते घटे प्राचीने भवने दुर्गादौ च इदानीमपि तद्ध्वंसोस्तीति वा इदानीं ध्वस्त इति वा प्रत्ययप्रसङ्गात्। न तु तथा कोपि प्रत्येति। ध्वंसस्तदासीदित्येव वा, ध्वस्तावशेषाः सन्तीति वा खलु प्रतीतिः। अन्यथा भूतले ह्यस्तनघटसंयोगध्वंससत्त्वेन अत्र घटसंयोगध्वंसोस्ति इत्यादिप्रतीतिः स्यात्, न च तथा प्रतीतिः किन्तु इदानीं घटसंयोगो नास्तीत्येव। ध्वंसात्मकाभावस्योत्पादकाभावादिकमत्राप्यूह्यम्।

### अभावस्य वस्तुतः धर्मराहित्यम्

वस्तुतः अभावो नाम न किमपि। न हि तस्याकृतिर्दृश्यते घटादीनामिव। आकृत्यभावे च न तस्योत्पत्तिः, निरोधः, विकारः कोपि वा। नास्तीति प्रतीत्या तु विषयीक्रियते। विषयत्वादयः धर्मिसत्तानिरपेक्षाः धर्मास्तु तत्र सन्ति, न तु कारणत्व-कार्यत्व-प्रयोजकत्वादयः, तेषाम्

आकृतिसापेक्षत्वात्। अभावस्य च तदभावात्। गुणादीनां तु द्रव्यकृतमेवाकृत्यादि। अभावस्तु केवलं अनाद्यनन्तकालपर्यन्तं तथैव तिष्ठति, न तु उत्पद्यते नश्यति वा। नास्तीति प्रतीतिबलाच्च घटादीनां विरुद्धो धर्मः कश्चन स्वीकरणीय इति स्वीक्रियते। अत एव तुच्छः अभावः। तुच्छः= निस्स्वरूपः।

न वा तस्य चक्षुरादिभिः संयोगः अन्यः संनिकर्षो वा संभवति, तस्य स्वरूपाभावात्। संयोगः खलु प्रतिघातिवस्त्वन्तरसापेक्षः, अत एव नाकाशेन चक्षुषः संनिकर्षः, न वा कालेन दिशा वा। अत एव अभावप्रतीतिरपि अभ्यासवशात् झटित्युत्पद्यमानापि अनुपलब्धिगम्यैव। अथ वा चक्षुरादीनामेव तादृशं सामर्थ्यं कल्पनीयं, येन अभावेन सह संयोगादिसंनिकर्षाभावेपि अधिकरणसंनिकर्षमात्रेण अभावग्रहणे क्षमाणि तानि भवन्ति।